International Journal of Sanskrit Research 2020; 6(2): 01-03

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 01-03
© 2020 IJSR
www.anantaajournal.com
Received: 01-01-2020
Accepted: 05-02-2020

**महीपतिः एस् जौय्स्**
शोधच्छात्रः, कर्नाटक संस्कृत विश्वविद्यालयः, बेङ्गलूरू कर्नाटक, भारत|

**Corresponding Author:**
**महीपतिः एस् जौय्स्**
शोधच्छात्रः, कर्नाटक संस्कृत विश्वविद्यालयः, बेङ्गलूरू, कर्नाटक, भारत|

# विवेकचन्द्रोदयनाटके वेदन्तदर्शनविचारः

## महीपतिः एस् जौय्स्

## प्रस्तावनम्

अस्माकं भारतीयसंस्कृतवाङ्मये वेदानाम् अत्युत्कृष्टस्थानं वर्तते। ते च वेदाः अपौरुषेयाः इत्यत एव तेषु प्रामाण्यम् अङ्गीक्रीयते। तेषु, मनुष्याणाम् उदात्तजीवननिर्वहणाय उपायाः निर्दिष्टाःसन्ति।तथैव च मानवजीवनस्य लक्ष्यं किं भवेत् इति बहु विस्तृतं तत्र प्रतिपादितं वर्तते। तदर्थं वर्णाश्रमव्यवस्थां कृत्वा केषां किं कार्यं, के किं कुर्वन्ति चेत् समाजस्य हितं परिरक्षितं भवति, इति सर्वं,मानवस्य सकल प्राणिजातस्य च स्व जीवन साफल्यायै बोधितं वर्तते। तर्हि किं मानव जीवनस्य अन्तिमं लक्ष्यं? इति चेत्, मानवजीवनस्य अन्तिमं लक्ष्यं भवति परमपुरुषार्थप्राप्तिः। किमर्थं तदेवलक्ष्यं भवेत् इत्युक्तौ उच्यते,यदुच्यते परमपुरुषार्थः इति, तत् नित्यं,शश्वतं स्थानं। “न स पुनरावर्तते”[1] इति श्रुतेः। यत् नित्यं तत् प्रसव्यं नतु अनित्यं,यतोऽहि अनित्यं सर्वदा क्षणिकं बहुकालं न तिष्ठति। इदमेव तत्वं वेदैः अन्तिमतया उपदिष्यते, अर्थात् वेदस्य अन्तभगः अथवा सारभूतः भागःइति कथ्यते तदेव वेदान्तः।

**कालं गते सति, एतदृशं तत्वं वेदैः प्रतिपादितं इति विदितुं असमर्थाः मानवाः केवलं स्वकर्मपराः जाताः।इदं ज्ञात्वा केचन आचार्याः दार्शनिकाः, वेदप्रतिपाद्यम् अर्थं जनाः अवगच्छेयुः इति शास्त्राणि दर्शनानि च रचितवन्तः।ते च स्वबुद्ध्यनुसारेण इदमेव तत्वं भिन्न भिन्नतया प्रतिपादितवन्तः।अग्रे कलिकालेन कवलिताः एतादृश विषयेऽपि अनवधानाः बभूवुः।किन्तु महतां मनस्सु तत्वं तवत् येन केन वा प्रकारेण अस्माभिः प्रसारणीयमिति नाट्यं नाटकं काव्यं इति दृष्य श्रव्य प्रकाराणि आनन्ददायकानि साधनानि आविष्कृतवन्तः। अनेन प्रकारेण वैदिक तत्वानि जनाः जानीयुः, तेन स्वजीवनं सफलीकुर्युः इति । एतादृश अभिनयप्रकारान् यदा पश्यामः तदा अस्माकम् अस्तित्वं विस्मृत्य तत्र लीनाः भवेम तदेव एकीभावः इति कथ्यते तदनिभोक्तव्यं तादृश भावं गन्तव्यम्।तथैव तत्काले अस्माभिः आनन्दः अनुभूयते। सः आनन्दः अनुभूतव्य। यतोऽहि सः आनन्दविशेषः परमात्मस्वरूपः। तादृश भावं यथा यथा अधिकं प्राप्नुमः तथा तथा तन्मार्गे गन्तुं प्रेरणा अधिका भवति। येन स्वजीवनसाफल्यं विन्दामः।एतादृश भावः रूपकाणां दर्शनावसरे कथं भवितुमर्हति इति पुनः ज्ञापयितुं कश्चन प्रयासः क्रीयते ।**

अस्य पत्रस्य विषयः वर्तते “संस्कृतनाटक साहित्ये दार्शनिक विचारः” इति। तर्हि किं नाम दर्शनं ? इत्यस्य उत्तरं “तत्वज्ञानसाधनं शास्त्रं” इति, तर्हि किं तत् तत्वं वेदान्ते प्रतिपाद्यते? चेत् तत्वं च

[1] (छां.उ ८-१५-१)

"ब्रह्मैव नित्यं वस्तु ततः अन्यदखिलम् अनित्यम्"[2] इति ज्ञानमेव। एतादृशं तात्विकं चिन्तनं नाटकेषु कुत्र विद्यते इति चिन्तनम् अत्र विषयः।

तादृशेषु बहुषु नाटकेषु "विवेकचन्द्रोदयः" इति नाटकमपि अन्यतमम्।इदं तु नाटकं "शिवः"इति नाम्ना भूषितेन कविना विरचितम्।नाटकेऽस्मिन् चत्वारः अङ्काः सन्ति।अस्य नाटकस्य कथाभागः "रुक्मिण्याहरणम्"। प्रथमतया अस्य नाटकस्य सम्पादनं "के.वि.शर्म" महोदयेन कृतम्,प्रकाशनञ्च "विश्वेश्वरानन्द-संस्थानम्-होशिआपुरम्" द्वारा कृतम्।।

विषयप्रस्तावः

"विवेकचन्दोदयाख्यं" नाटकमिदमवलोकयामश्चेत् ज्ञायते अयं शिवाख्यः कविः कश्चन दार्शनिकः इति, यतोऽहि नाटकेऽस्मिन् स्पष्टं कण्ठरवेण वेदान्तदर्शनविषयाः उच्यन्ते। तत्र प्रथमाङ्के प्रसङ्गः एवमायाति, तत्र "सिद्धिदेवः" इति कश्चन गुरुः "चारुकणठः" इति तच्छिष्यः, एतयोरुभयोः संवादः आरभ्यते।

गुरुः सिद्धिदेवः – वत्स! पश्य इह। एषा रुक्मिणीजनकस्य भीष्मकस्य राजधानी "कुण्डिनपुरी" इति,राजधान्यः इयं द्वारावती "सुधर्मा सभा" यत्र च परमानन्दमयमूर्तिः परमकारुणिकः भगवान् श्रीकृष्णः अधिवसति। इति।

चारुकण्ठः – आचार्य! देवः नारायणः अपि स्वलोकं परित्यज्य द्वारकां समधितिष्ठति? इति।

सिद्धिदेवः – वत्स!

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥[3]

इति पुराणवचनानुसारेण विष्णुलोकसदृशी इयमपि द्वारावती मथुरा च, अतः नारायणः अत्र वसति इति।

चारुकण्ठः – सत्यं सप्तपुर्यः मुक्तिदाः भवन्ति इति पुराणानि जल्पन्ति, किन्तु मुक्त्यां जातायां कथं जन्म ? अजन्मनस्यऽपि नारायणस्य अस्यां मथुरायां कथं जन्म जातम् ?तत् अन्येषां जन्मस्वभावानां कथं जन्म न करोति ?तत् पुराणवाण्याः विश्वासः न कर्तव्यः।

सिद्धिदेवः – भो वत्स! अज्ञानविजृम्भणेन मुक्तेः स्वरूपं न जानासि, मुक्तस्य च विषये न जानासि, इति। अत्र अस्माभिः द्रष्टव्यं, यत् वेदान्तिभिः प्रतिपाद्यते "अज्ञानेनावृतंज्ञानं तेन मुह्यन्ति जन्तवः"इति अर्थात् एकत्वेन विद्यमानमपि इदं जगत् अज्ञानेन अहङ्कारममकारादि भावेन नानात्वेन प्रतीयते इति तदेव अत्र कविना प्रतिपादितम्,अस्मिन् सन्दर्भे अज्ञानस्य स्वरूपमपि अस्माभीः अवलोकनीयम्भवति। अज्ञानस्य स्वरूपं हस्तामलकस्तोत्रे सम्यक् सुलभतया च प्रतिपादितं श्लोकेनानेन -

"घनच्छन्नदृष्टिः घनच्छन्नमर्कं यथामन्यते निष्प्रभञ्चाति मूढः।
तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिः स्वरूपोहमात्मा ॥[4]इति

यदा तादृशमज्ञानं वयं चित्तशुद्ध्या निवारयामः तदा, न अयं आत्मा बद्धः,इति ज्ञानमुदेति। तदुक्तं भगवता श्रीकृष्णेन –

"ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवद्ज्ञानं प्रकाशयति तत्परम् ॥[5] इति

एवं च अत्र ज्ञातव्यं यत्, यदस्माभिः अवगन्तव्यं यच्च प्राप्तव्यं तत् अज्ञानेन आच्छादितं वर्तते, तस्य अपसारणेन यत्प्राप्तव्यं यच्च अवगन्तव्यं,तत् अवश्यं प्राप्यते तदेव अस्माकं जीवनस्य प्रमुखं लक्ष्यं,इत्येवं भावं अत्र प्रकटयति कविः। एवं भावं प्रकाशयन् कविः अग्रे सिद्धिदेवस्य मुखात् श्लोकं इदं वाचयति -

बहिरन्तः पुरः पश्चात् जगतो यो जगच्च यः।
जन्मनश्च स्थितेस्तस्य कथां कः कर्तुमीश्वरः ॥[6]इति

[2] (वे.सा. १६)

[3] (वि.चं -१-१०)

[4] (हस्तामलकम् - १० )

[5] (भ,गी ५-१६)

[6] (वि.चं १-११)

अस्मिन् श्लोकेऽपि वयं दार्शनिकं चिन्तनं द्रष्टुं शक्नुमः – जगतः बहिः,अन्तः च यः वर्तते, जगत् रूपेण च यः वर्तते, अस्य जगतः जन्मनः, स्थितेश्च यः कारणरूपेण वर्तते स एव अयं एकः परः नारायणः ईश्वरः इति। इदमेव उपनिषदमाधारीकृत्य वेदान्तिभिः उच्यते –

"सोकामयत। बहुस्यां प्रजायेयेत। स तपो तप्यत। स तपस्तस्वा। इदगुं सर्वमसृजत। यदिदं किं च। तत् सृष्ट्वा। तदेवानुप्राविषत्। तदनुप्रविष्या। सच्चत्यच्चाभवत्"[7] इति श्रुत्या, अर्थात् ब्रंह्म अकामयत अहं बहु भवेयं इति अतः तपसः बलात् इदं सर्वं जगत् सृष्ट्वा तदेव प्रविष्य सत् रूपेण असत् रूपेण च स्थितं इति तदर्थः जगतः कारणं यत् तत् जगद्रूपेण अपि वर्तते इति, इदमेव भगवता श्रीकृष्णेनापि उक्तं –

बहिरन्तश्च भूतानां भोक्ता च प्रभुरेव च।
अहं कृथ्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥
मत्तः परतरन्नन्यत्किञ्चिदस्ति धनञ्जय।

मयि सर्वमिदं प्रोक्तं सूत्रे मणिगणा इव ॥[8] इति ॥

इत्येवं अत्र प्रथमाङ्के अनयोरुभयोः संवादेन दार्शनिकं तत्वं ज्ञातुं शक्नुमः। एतादृश विचारान् समग्रे नाटके वयं द्रष्टुं शक्नुमः। एवम् अन्यत्राऽपि नाटकेषु एतादृश विचारान्, दर्शनान्तरविषयान् अपि द्रष्टुं प्रभवामः। एतादृश भावमवाहयन्तः यदा नाटकं पश्यामः,तदा अज्ञानात् अस्माभिः बहिरागन्तव्यमिति भावः उदेति, इदमेव दार्शनिकं चिन्तनम्।।

आकरग्रन्थाः


1. छान्दोग्योपनिषत्
2. वेदान्तसारः.
3. विवेकचन्द्रोदयनाटकम्
4. हस्तामलकम्
5. भगवद्गीता
6. तैत्तिरीयोपनिशत्.ब्रम्हानन्दवल्ली


[7] (तै.उ.ब्रं.वल्ली - ६)

[8] (भ.गी ७-६,७)